तत्त्वार्थश्रद्धानं सम्यक्त्वं । तस्मिन्प्रशमादयोऽनन्तरोदिताः प्रथमकषायोपशमाद्यपेक्षया भवन्ति नियमेन । अयमत्र भावार्थः। न ह्यनन्तानुबन्धिक्षयोपशमादिमन्तरेण तत्त्वार्थश्रद्धानं भवति। सति च तत्क्षयोपशमे तदुदयवद्भ्यः सकाशादपेक्षयास्य प्रशमादयो विद्यन्त एवेति तत्त्वार्थश्रद्धानं सम्यक्त्वमित्युक्तं ।

के एते तत्त्वार्था इत्येतदभिधित्सयाह।

जीवाजीवासवबंधसंवरा निज्जरा य मुक्खो य।
तत्तत्था इत्थं पुण दुविहा जीवा समक्खाया॥ ६३ ॥

[ जीवाजीवास्रवबन्धसंवरा निर्जरा च मोक्षश्च ।
तत्त्वार्था अत्र पुनः द्विविधा जीवाः समाख्याताः॥६३॥ ]

जीवाजीवास्रवबन्धसंवरा निर्जरा च मोक्षश्च तत्त्वार्था इति। एषां स्वरूपं वक्ष्यत्येव । असमासकरणं गाथाभंगभयार्थं निर्जरामोक्षयोः फलत्वेन प्राधान्यख्यापनार्थं चेति । अत्र पुनस्तत्त्वार्थचिन्तायां द्विविधा जीवाः समाख्यातास्तीर्थकरगणधरैरिति ।

द्वैविध्यमाह ।

संसारिणो य मुत्ता संसारी छव्विहा समासेण
पुढवीकाइअमादि तसकायंता पुढोभेया ॥ ६४ ॥

[ संसारिणः च मुक्ताः संसारिणः षड्विधाः समासेन ।
पृथिवीकायिकादयस्त्रसकायान्ताः पृथग्भेदाः ॥ ६४ ॥ ]

चशब्दस्य व्यवहित उपन्यासः । संसारिणो मुक्ताश्चेति । तत्र

संसारिणः षड्विधाः षट्प्रकाराः। समासेन जातिसंक्षेपेणेति भावः। षड्विधत्वमेवाह। पृथिवीकायिकादयस्त्रसकायान्ताः। यथोक्तं "पुढविकाइया आउकाइया तेउकाइया वाउकाइया वणस्सइकाइया तसकाइया" पृथग्भेदा इति स्वातन्त्र्येण पृथग्भिन्नस्वरूपाः न तु परमपुरुषविकारा इति॥

संसारिण एव प्रतिपादयन्द्वारगाथामाह।

भव्वाहारगपज्जत्तसुक्कसोवक्कमाउया चेव।
सप्पडिपक्खा एए भणिया कम्मट्ठमहणेहिं॥ ६५॥

[ भव्याहारकपर्याप्तशुक्लसोपक्रमायुषश्चैव।
सप्रतिपक्षा एते भणिता अष्टकर्ममथनैः॥ ६५॥ ]

भव्या आहारकाः पर्याप्ताः शुक्ला इति शुक्लपाक्षिकाः सोपक्रमायुषश्चैव सप्रतिपक्षा एते भणिताः। तद्यथा। भव्याश्चाभव्याश्चाहारकाश्चेत्यादि। कैर्भणिता इत्याह। अष्टकर्ममथनैः तीर्थकरैरिति गाथाक्षरार्थः॥ भावार्थं तु स्वयमेव वक्ष्यति।

तत्राद्यद्वारमाह।

भव्वा जिणेहि भणिया इह खलु जे सिद्धिगमणजोगाउ।
ते पुण अणाइपरिणामभावओ हुंति नायव्वा॥६६॥

[ भव्या जिनैर्भणिता इह खलु ये सिद्धिगमनयोग्यास्तु।
ते पुनरनादिपरिणामभावतो भवन्ति ज्ञातव्याः॥६६॥ ]

भव्या जिनैर्भणिता इह खलु ये सिद्धिगमनयोग्यास्तु। इह

[ अथ तु तथाभावमपि करोति घ्नन्नेव नान्यथा येन ।
तत्कर्तव्य एव तको नो तत्प्रतिपक्षबन्धात् ॥ १६१ ॥ ]

अथैवं मन्यसे तथाभावमपि सम्मोहभावमपि प्रतनुबन्धेन कर्मक्षयहेतुं करोति घ्नन्नेव व्यापादयन्नेव नान्यथा येन कारणेन तत्तस्मात्कर्तव्य एव तको वध इत्याशङ्क्याह नो नैतदेवं तत्प्रतिपक्षबन्धाद्वधप्रतिपक्षोऽवधस्तस्माद्वन्धादन्यथात्रधात्तत्क्षयानुपपत्तिरविरोधादिति ।

एवं च मुत्तबंधादओ इहं पुव्ववन्निया दोसा ।
अणिवारणिज्जपसरा अब्भुवगयबाहगा नियमा १६२

[ एवं च मुक्तबन्धादय इह पूर्ववर्णिता दोषाः ।
अनिवारितप्रसरा अभ्युपगमबाधका नियमेन ॥ १६२॥]

एवं चावधाद्वन्धापत्तौ मुक्तबन्धादय इह पूर्ववर्णिता दोषा अनिवारितप्रसरा अभ्युपगमबाधका वधात्कर्मक्षय इत्यङ्गीकृतविरोधिनो नियमेन अवश्यतयेति उपसंहरन्नाह ।

इय एवं पुव्वावरलोगविरोहाइदोससयकलियं ।
मुध्दजणविम्हयकरं मिच्छत्तमलं पसंगेणं ॥ १६३ ॥

[ इति एवं पूर्वापरलोकविरोधादिदोषशतकलितम् ।
मुग्धजनविस्मयकरं मिथ्यात्वमलं प्रसङ्गेन ॥ १६३ ॥ ]

इय एवमेतत्पूर्वापरलोकविरोधादिदोषशतकलितं मुग्धजनविस्मयकरं संसारमोचकमतं मिथ्यात्वं अलं पर्याप्तं प्रसङ्गेनेति ॥

अधुनान्यद्वादस्थानकमाह

**अन्ने आगंतुगदोससंभवा बिंति वहनिवित्तीओ ।**
**दोण्ह वि जणाण पावं समयंमि अदिट्ठपरमत्था॥१६४॥**

[ अन्ये आगन्तुकदोषसंभवात् ब्रुवते वधनिवृत्तेः ।
द्वयोरपि जनयोः पापं समये अदृष्टपरमार्थाः ॥ १६४ ॥]

अन्ये वादिनः आगन्तुकदोषसंभवात्कारणात् ब्रुवते किं वधनिवृत्तेः सकाशाद्द्वयोरपि जनयोः प्रत्याख्यातृप्रत्याख्यापयित्रोः पापं समये आगमे अदृष्टपरमार्था अनुपलब्धभावार्था इति ॥

आगन्तुकदोषसंभवमाह ।

**सव्ववहसमत्थेणं पडिवन्नाणुव्वएण सिंहाई ।**
**ण घाईओ त्ति तेणं तु घाइत्तो जुगप्पहाणो उ॥१६५॥**

[ सर्ववधसमर्थेन प्रतिपन्नाणुव्रतेन सिंहादिः ।
न घातित इति तेन तु घातितो युगप्रधानस्तु ॥१६५॥ ]

सर्ववधसमर्थेन सिंहादिक्रूरसत्त्वव्यापादनक्षमेण प्रतिपन्नाणुव्रतेन सता सिंहादिः सिंहः शरभो वा न घातित इति तेन तु सिंहादिना घातितो युगप्रधानोऽनुयोगधर एक एवाचार्यः । संभवत्येतदिति॥

**तत्तो तित्थुच्छेओ धणियमणत्थो पभूयसत्ताणं ।**
**ता कह न होइ दोसो तेसिमिह निवित्तिवादीणं॥१६६॥**

[ ततः तीर्थोच्छेदः अत्यर्थं अनर्थः प्रभूतसत्त्वानाम् ।
तत् कथं न भवति दोषःतेषामिह निवृत्तिवादिनाम् १६६]

ततस्तस्मादाचार्यघातात्तीर्थोच्छेदः धनितमत्यर्थमनर्थः प्रभूतसत्त्वानां दर्शनाद्यनवाप्त्या मुमुक्षूणां यतश्चैवं तत्तस्मात् कथं न भवति दोषः तेषां प्रत्याख्यातृप्रत्याख्यापयितॄणां इह विनाशकरणे निवृत्तिवादिनां भवत्येवेति ।

तम्हा नेव निवित्ती कायव्वा अवि य अप्पणा चेव ।
अद्धोचियमालोचिय अविरुद्धं होइ कायव्वं ॥१६७॥

[ तस्मात् नैव निवृत्तिः कार्या अपि चात्मनैव ।
अद्धोचितमालोच्य अविरुद्धं भवति कर्तव्यम् ॥१६७॥

यस्मादेवं तस्मान्नैव निवृत्तिः कार्या अपि चात्मनैवाद्धोचितं कालोचितमालोच्य अविरुद्धं भवति कर्तव्यं यद्यस्यामवस्थायां परलोकोपकारीति एषः पूर्वपक्षः । अत्रोत्तरमाह ।

सीहवहरक्खिओ सो उड्डाहं किंपि कहवि काऊणं ।
किं अप्पणो परस्स य न होइ अवगारहेउ त्ति १६८

[ सिंहवधरक्षितोऽसौ उड्डाहं किमपि कथमपि कृत्वा ।
किं आत्मनः परस्य च न भवत्यपकारहेतुरिति ॥१६८॥]

एवमपि दोषसंभवे नन्विदमपि संभवति । सिंहवधरक्षितोऽसावाचार्य उड्डाहमुपघातं किमपि योषिदासेवनादिकं कथमपि क्लिष्टकर्मोदयात् कृत्वा किमात्मनोऽबोधिलाभनिवर्तनीयकर्मबंधहेतुत्वेन परस्य च श्रावकादेर्विपरिणामकरणेन न भवत्यपकारहेतुर्भवत्येवेति ॥

त्तथा कर्म कृतमनेनेति । वधकोऽनपराध इति एष पूर्वपक्षः । अत्रोत्तरमाह ।

**नियकयकम्मुवभोगे वि संकिलेसो धुवं वहंतस्स ।**
**तत्तो बंधो तं खलु तव्विरईए विवज्जिज्जा ॥ २१३ ॥**

[ निजकृतकर्मोपभोगे ऽपि संक्लेशः ध्रुवं घ्नतः ।
ततः बन्धः तं खलु तद्विरत्या वर्जयेत् ॥ २१३ ॥]

निजकृतकर्मोपभोगेऽपि व्यापाद्यव्यापत्तौ स्वकृतकर्मविपाकेऽपि सति तस्य संक्लेशोऽकुशलपरिणामो ध्रुवमवश्यं घ्नतो व्यापादयतस्ततस्तस्मात्संक्लेशाद्बन्धस्तं खलु तमेव बन्धं तद्विरत्या वधविरत्या वर्जयेदिति ॥

**तत्तु च्चिय मरियव्वं इय बद्धे आउयंमि तव्विरई ।**
**नणु किं साहेइ फलं तदारओ कम्मखवणं तु॥२१४॥**

[ ततः एव मर्तव्यं एवं बद्धे आयुषि तद्विरतिः ।
ननु किं साधयति फलं तदारतः कर्मक्षपणम् ॥२१४॥ ]

तत एव देवदत्तादेः सकाशात् मर्तव्यं इय एवमनेन प्रकारेण बद्धे आयुषि उपात्ते आयुष्कर्मणि व्यापाद्येन वधविरतिर्ननु किं साधयति फलं तस्यावश्यभावित्वेन तदसंभवात् विरत्यसंभवात् न किंचिदित्यभिप्रायः । अत्रोत्तरं तदारतः कर्मक्षपणं तु मरणकालादारतः वधविरतिः कर्मक्षयमेव साधयतीति गाथार्थः । एतदेव भावयति ।

तत्तु च्चिय सो भावो जायइ सुद्धेण जीववीरिएण ।
कस्सइ जेण तयं खलु अवहित्ता गच्छई मुक्खं॥२१५॥

[ तत एव स भावः जायते शुद्धेन जीववीर्येण ।
कस्यचित् येन तकं खलु अहत्वा गच्छति मोक्षम् ॥२१५॥]

तत एव वधविरतेः स भावः चित्तपरिणामलक्षणो जायते शुद्धेन जीववीर्येण कर्मानभिभूतेनात्मसामर्थ्येन कस्यचित्प्राणिनो येन भावेन तकं व्यापाद्यं अवधित्वा अहत्वैव गच्छति मोक्षं प्राप्नोति निर्वाणमिति ॥

इय तस्स तयं कम्मं न जहकयफलं ति पावई अह तु ।
तं नो अज्झवसाणा ओवट्टणमाइभावाओ ॥२१६ ॥

[ एवं तस्य तकं कर्म न यथाकृतफलमेव प्राप्नोति अथ तु ।
तन्न अध्यवसायात् अपवर्तनादिभावात् ॥ २१६ ॥ ]

इय एवमुक्तेन न्यायेन तस्य व्यापाद्यस्य तत्कर्म अस्मान्मर्तव्यमित्यादिलक्षणं न यथाकृतफलमेव ततो मरणाभावात्प्राप्नोत्यापद्यते अथ त्वमेवं मन्यसे इत्याशङ्क्याह ॥ तन्न तदेतन्न अध्यवसायात्तथाविधचित्तविशेषादपवर्तनादिभावात्तथा ह्राससंक्रमानुभवश्रेणिवेदनादिति गाथार्थः ।

सकयं पि अणेगविहं तेण पगारेण भुंजिउं सव्वं ।
अपुव्वकरणजोगा पावइ मुक्खं तु किं तेण ॥ २१७॥

